श्री त्रिपुरसुंदरी वेदपाद स्तवः

श्री त्रिपुरसुंदरी वेदपाद स्तवः

वेदपादस्तवं वक्ष्ये देव्याः प्रियचिकीर्षया |
यथामति मतिं देवस्तन्नो दंतिः प्रचोदयात् || 1 ||

अकिंचित्करकर्मभ्यः प्रत्याहृत्य कृपावशात् |
सुब्रह्मण्यः स्तुतावस्यां तन्नः षण्मुखः प्रचोदयात् || 2 ||

अकारादिक्षकारांतवर्णावयवशालिनी |
वीणापुस्तकहस्ताव्यात्प्रणो देवी सरस्वती || 3 ||

या वर्णपदवाक्यार्थगद्यपद्यस्वरूपिणी |
वाचि नर्तयतु क्षिप्रं मेधां देवी सरस्वती || 4 ||

उपास्यमाना विप्रेंद्रैः संध्यासु च तिसृष्वपि |
सद्यः प्रसीद मे मातः संध्याविद्ये सरस्वती || 5 ||

मंदा निंदालोलुपाहं स्वभावा-
-देतत्स्तोत्रं पूर्यते किं मयेति |
मा ते भीतिर्हे मते त्वादृशाना-
-मेषा नेत्री राधसा सूनृतानां || 6 ||

तरंगभ्रुकुटीकोटिभंग्या तर्जयते जरां |
सुधामयाय शुभ्राय सिंधूनां पतये नमः || 7 ||

तस्य मध्ये मणिद्वीपः कल्पकारामभूषितः |
अस्तु मे ललितावासः स्वस्तिदा अभयंकरः || 8 ||

कदंबमंजरीनिर्यद्वारुणीपारणोन्मदैः |
द्विरेफैर्वर्णनीयाय वनानां पतये नमः || 9 ||

तत्र वप्रावली लीला गगनोल्लंघिगोपुरं |
मातः कौतूहलं दद्यात्सगृंहार्यं नगरं तव || 10 ||

मकरंदझरीमज्जन्मिलिंदकुलसंकुलां |
महापद्माटवीं वंदे यशसा संपरीवृतां || 11 ||

तत्रैव चिंतामणिधोरणार्चिभि-
-र्विनिर्मितं रोपितरत्नशृंगं |
भजे भवानीभवनावतंस-
-मादित्यवर्णं तमसः परस्तात् || 12 ||

मुनिभिः स्वात्मलाभाय यच्चक्रं हृदि सेव्यते |
तत्र पश्यामि बुद्ध्या तदक्षरे परमे व्योमन् || 13 ||

पंचब्रह्ममयो मंचस्तत्र यो बिंदुमध्यगः |
तव कामेशि वासोऽयमायुष्मंतं करोतु मां || 14 ||

नानारत्नगुलुच्छालीकांतिकिम्मीलितोदरं |
विमृशामि वितानं तेऽतिश्लक्ष्णमतिलोमशं || 15 ||

पर्यंकतल्पोपरि दर्शनीयं
सबाणचापांकुशपाशपाणिं |
अशेषभूषारमणीयमीडे
त्रिलोचनं नीलकंठं प्रशांतं || 16 ||

जटारुणं चंद्रकलाललामं
उद्वेललावण्यकलाभिरामं |
कामेश्वरं कामशरासनांकं
समस्तसाक्षिं तमसः परस्तात् || 17 ||

तत्र कामेशवामांके खेलंतीमलिकुंतलां |
सच्चिदानंदलहरीं महालक्ष्मीमुपास्महे || 18 ||

चारुगोरोचनापंकजंबालितघनस्तनीं |
नमामि त्वामहं लोकमातरं पद्ममालिनीं || 19 ||

शिवे नमन्निर्जरकुंजरासुर-
-प्रतोलिकामौलिमरीचिवीचिभिः |
इदं तव क्षालनजातसौभगं
चरणं नो लोके सुधितां दधातु || 20 ||

कल्पस्यादौ कारणेशानपि त्री-
-न्स्रष्टुं देवि त्रीन्गुणानादधानां |
सेवे नित्यं श्रेयसे भूयसे त्वा-
-मजामेकां लोहितशुक्लकृष्णां || 21 ||

केशोद्भूतैरद्भुतामोदपूरै-
-राशाबृंदं सांद्रमापूरयंतीं |
त्वामानम्य त्वत्प्रसादात्स्वयंभू-
-रस्मान्मायी सृजते विश्वमेतत् || 22 ||

अर्धोन्मीलद्यौवनोद्दामदर्पां
दिव्याकल्पैरर्पयंतीं मयूखान् |
देवि ध्यात्वा त्वां पुरा कैटभारि-
-र्विश्वं बिभर्ति भुवनस्य नाभिः || 23 ||

कल्हारश्रीमंजरीपुंजरीतिं
धिक्कुर्वंतीमंब ते पाटलिम्ना |
मूर्तिं ध्यात्वा शाश्वतीं भूतिमाय-
-न्निंद्रो राजा जगतो य ईशे || 24 ||

देवतांतरमंत्रौघजपश्रीफलभूतया |
जापकस्तव देव्यंते विद्यया विंदतेऽमृतं || 25 ||

पुंस्कोकिलकलक्वाणकोमलालापशालिनि |
भद्राणि कुरु मे मातर्दुरितानि परासुव || 26 ||

अंतेवासिन्नस्ति चेत्ते मुमुक्षा
वक्ष्ये युक्तिं मुक्तसर्वैषणः सन् |
सद्भ्यः साक्षात्सुंदरीं ज्ञप्तिरूपां
श्रद्धाभक्तिध्यानयोगादवेहि || 27 ||

षोढान्यासादिदेवैश्च सेविता चक्रमध्यगा |
कामेशमहिषी भूयः षोडशी शर्म यच्छतु || 28 ||

शांतो दांतो देशिकेंद्रं प्रणम्य
तस्यादेशात्तारकं मंत्रतत्त्वं |
जानीते चेदंब धन्यः समानं
नातः परं वेदितव्यं हि किंचित् || 29 ||

त्वमेव कारणं कार्यं क्रिया ज्ञानं त्वमेव च |
त्वामंब न विना किंचित्त्वयि सर्वं प्रतिष्ठितं || 30 ||

परागमद्रींद्रसुते तवांघ्रि-
-सरोजयोरंब दधामि मूर्ध्ना |
अलंकृतं वेदवधूशिरोभि-
-र्यतो जातो भुवनानि विश्वा || 31 ||

दुष्टांदैत्यान्हंतुकामां महर्षीन्
शिष्टानन्यान्पातुकामां कराब्जैः |
अष्टाभिस्त्वां सायुधैर्भासमानां
दुर्गां देवीगं् शरणमहं प्रपद्ये || 32 ||

देवि सर्वानवद्यांगि त्वामनादृत्य ये क्रियाः |
कुर्वंति निष्फलास्तेषामदुग्धा इव धेनवः || 33 ||

नाहं मन्ये दैवतं मान्यमन्य-
-त्त्वत्पादाब्जादंबिके कुंभजाद्याः |
ये ध्यातारो भक्तिसंशुद्धचित्ताः
परामृतात्परिमुच्यंति सर्वे || 34 ||

कुर्वाणोऽपि दुरारंभांस्तव नामानि शांभवि |
प्रजपन्नेति मायांतमति मृत्युं तराम्यहं || 35 ||

कल्याणि त्वं कुंदहासप्रकाशै-
-रंतर्ध्वांतं नाशयंती क्षणेन |
हंतास्माकं ध्यायतां त्वत्पदाब्ज-
-मुच्चतिष्ठ महते सौभगाय || 36 ||

तितीर्षया भवांभोधेर्हयग्रीवादयः पुरा |
अप्रमत्ता भवत्पूजां सुविद्वांसो वितेनिरे || 37 ||

मद्वश्या ये दुराचारा ये च सन्मार्गगामिनः |
भवत्याः कृपया सर्वे सुवर्यंतु यजमानाः || 38 ||

श्रीचक्रस्थां शाश्वतैश्वर्यदात्रीं
पौंड्रं चापं पुष्पबाणांदधानां |
बंधूकाभां भावयामि त्रिनेत्रां
तामग्निवर्णां तपसा ज्वलंतीं || 39 ||

भवानि तव पादाब्जनिर्णेजनपवित्रताः |
भवामयप्रशांत्यै त्वामपो याचामि भेषजं || 40 ||

चिदानंदसुधांभोधेस्तवानंदलवोऽस्ति यः |
कारणेशैस्त्रिभिः साकं तद्विश्वमुपजीवति || 41 ||

नो वा यागैर्नैव पूर्तादिकृत्यै-
-र्नो वा जप्यैर्नो महद्भिस्तपोभिः |
नो वा योगैः क्लेशकृद्भिः सुमेधा
निचाय्येमां शांतिमत्यंतमेति || 42 ||

प्रातः पाहि महाविद्ये मध्याह्ने तु मृडप्रिये |
सायं पाहि जगद्वंद्ये पुनर्नः पाहि विश्वतः || 43 ||

बंधूकाभैर्भानुभिर्भासयंती
विश्वं शश्वत्तुंगपीनस्तनार्धा |
लावण्याब्धेः सुंदरि त्वं प्रसादा-
-दायुः प्रजागृं रयिमस्मासु धेहि || 44 ||

कर्णाकर्णय मे तत्त्वं या चिच्छक्तिरितीर्यते |
त्रिर्वदामि मुमुक्षूणां सा काष्ठा सा परा गतिः || 45 ||

वाग्देवीति त्वां वदंत्यंब केचि-
-ल्लक्ष्मीर्गौरीत्येवमन्येऽप्युशंति |
शश्वन्मातः प्रत्यगद्वैतरूपां
शंसंति केचिन्निविदो जनाः || 46 ||

ललितेति सुधापूरमाधुरीचोरमंबिके |
तव नामास्ति यत्तेन जिह्वा मे मधुमत्तमा || 47 ||

ये संपन्नाः साधनैस्तैश्चत्तुर्भिः
शुश्रूषाभिर्देशिकं प्रीणयंति |
सम्यग्विद्वान् शुद्धसत्त्वांतराणां
तेषामेवैतां ब्रह्मविद्यां वदेत || 48 ||

अभिचारादिभिः कृत्यां यः प्रेरयति मय्युमे |
तव हुंकारसंत्रस्ता प्रत्यक्कर्तारमृच्छतु || 49 ||

जगत्पवित्रि मामिकामपाहराशु दुर्जरां |
प्रसीद मे दयाधुने प्रशस्तिमंब नः स्कृधि || 50 ||

कदंबारुणमंबाया रूपं चिंतय चित्त मे |
मुंच पापीयसीं निष्ठां मा गृधः कस्य स्विद्धनं || 51 ||

भंडभंडनलीलायां रक्तचंदनपंकिलः |
अंकुशस्तव तं हन्याद्यश्च नो द्विषते जनः || 52 ||

रे रे चित्त त्वं वृधा शोकसिंधौ
मज्जस्यंतर्वच्म्युपायं विमुक्त्यै |
देव्याः पादौ पूजयैकाक्षरेण
तत्ते पदं संग्रहेण ब्रवीम्यों || 53 ||

चंचद्बालातपज्योत्स्नाकलामंडलशालिने |
ऐक्षवाय नमो मातर्बाहुभ्यां तव धन्वने || 54 ||

तामेवाद्यां ब्रह्मविद्यामुपासे
मूर्तैर्वेदैः स्तूयमानां भवानीं |
हंत स्वात्मत्वेन यां मुक्तिकामो
मत्वा धीरो हर्षशोकौ जहाति || 55 ||

शरणं करवाण्यंब चरणं तव सुंदरि |
शपे त्वत्पादुकाभ्यां मे नान्यः पंथा अयनाय || 56 ||

रत्नच्छत्रैश्चामरैर्दर्पणाद्यै-
-श्चक्रेशानीं सर्वदोपाचरंत्यः |
योगिन्योऽन्याः शक्तयश्चाणिमाद्या
यूयं पातः स्वस्तिभिः सदा नः || 57 ||

दरिद्रं मां विजानीहि सर्वज्ञासि यतः शिवे |
दूरीकृत्याशु दुरितमथा नो वर्धया रयिं || 58 ||

महेश्वरि महामंत्रकूटत्रयकलेबरे |
कादिविद्याक्षरश्रेणिमुशंतस्त्वा हवामहे || 59 ||

मूलाधारादूर्ध्वमंतश्चरंतीं
भित्त्वा ग्रंथीन्मूर्ध्नि निर्यत्सुधार्द्रां |
पश्यंतस्त्वां ये च तृप्तिं लभंते
तेषां शांतिः शाश्वती नेतरेषां || 60 ||

मह्यं द्रुह्यंति ये मातस्त्वद्ध्यानासक्तचेतसे |
तानंब सायकैरेभिरव ब्रह्मद्विषो जहि || 61 ||

त्वद्भक्तानामंब शांतैषणानां
ब्रह्मिष्ठानां दृष्टिपातेन पूतः |
पापीयानप्यावृतः स्वर्वधूभिः
शोकातिगो मोदते स्वर्गलोके || 62 ||

संतु विद्या जगत्यस्मिन्संसारभ्रमहेतवः |
भजेऽहं त्वां यया विद्वान्विद्ययामृतमश्नुते || 63 ||

विद्वन्मुख्यैर्विद्रुमाभं विशाल-
-श्रोणीशिंजन्मेखलाकिंकिणीकं |
चंद्रोत्तंसं चिन्मयं वस्तु किंचि-
-द्विद्धि त्वमेतन्निहितं गुहायां || 64 ||

न विस्मरामि चिन्मूर्तिमिक्षुकोदंडशालिनीं |
मुनयः सनकप्रेष्ठास्तामाहुः परमां गतिं || 65 ||

चक्षुःप्रेंखत्प्रेमकारुण्यधारां
हंसज्योत्स्नापूरहृष्यच्चकोरां |
यामाश्लिष्यन्मोदते देवदेवः
सा नो देवी सुहवा शर्म यच्छतु || 66 ||

मुंच वंचकतां चित्त पामरं चापि दैवतं |
गृहाण पदमंबाया एतदालंबनं परं || 67 ||

का मे भीतिः का क्षतिः किं दुरापं
कामेशांकोत्तुंगपर्यंकसंस्थां |
तत्त्वातीतामच्युतानंददात्रीं
देवीमहं निर्ऋतिं वंदमानः || 68 ||

चिंतामणिमयोत्तंसकांतिकंचुकिताननें |
ललिते त्वां सकृन्नत्वा न बिभेति कुतश्चन || 69 ||

तारुण्योत्तुंगितकुचे लावण्योल्लासितेक्षणे |
तवाज्ञयैव कामाद्या मास्मान्प्रापन्नरातयः || 70 ||

आकर्णाकृष्टकामासस्त्रसंजातं तापमंब मे |
आचामतु कटाक्षस्ते पर्जन्यो वृष्टिमानिव || 71 ||

कुर्वे गर्वेणापचारानपारा-
-नद्यप्यंब त्वत्पदाब्जं तथापि |
मन्ये धन्ये देवि विद्यावलंबं
मातेव पुत्रं बिभृतास्वेनं || 72 ||

यथोपास्तिक्षतिर्न स्यात्तव चक्रस्य सुंदरि |
कृपया कुरु कल्याणि तथा मे स्वस्तिरायुषि || 73 ||

चक्रं सेवे तारकं सर्वसिध्यै
श्रीमन्मातः सिद्धयश्चाणिमाद्याः |
नित्या मुद्रा शक्तयश्चांगदेव्यो
यस्मिंदेवा अधि विश्वे निषेदुः || 74 ||

सुकुमारे सुखाकारे सुनेत्रे सूक्ष्ममध्यमे |
सुप्रसन्ना भव शिवे सुमृडीका सरस्वती || 75 ||

विद्युद्वल्लीकंदलीं कल्पयंतीं
मूर्तिं स्फूर्त्या पंकजं धारयंतीं |
ध्यायन्हि त्वां जायते सार्वभौमो
विश्वा आशाः पृतनाः संजयंजयन् || 76 ||

अविज्ञाय परां शक्तिमात्मभूतां महेश्वरीं |
अहो पतंति निरयेष्वेके चात्महनो जनाः || 77 ||

सिंदूराभैः सुंदरैरंशुबृंदै-
-र्लाक्षालक्ष्म्यां मज्जयंतीं जगंति |
हेरंबांब त्वां हृदा लंबते य-
-स्तस्मै विशः स्वयमेवानमंते || 78 ||

तव तत्त्वं विमृशतां प्रत्यगद्वैतलक्षणं |
चिदानंदघनादन्यन्नेह नानास्ति किंचन || 79 ||

कंठात्कुंडलिनीं नीत्वा सहस्रारं शिवे तव |
न पुनर्जायते गर्भे सुमेधा अमृतोक्षितः || 80 ||

त्वत्पादुकानुसंधानप्राप्तसर्वात्मतादृशि |
पूर्णाहंकृतिमत्यस्मिन्न कर्म लिप्यते नरे || 81 ||

तवानुग्रहनिर्भिन्नहृदयग्रंथिरद्रिजे |
स्वात्मत्वेन जगन्मत्वा ततो न विजुगुप्सते || 82 ||

कदा वसुदलोपेते त्रिकोणनवकान्विते |
आवाहयामि चक्रे त्वां सूर्याभां श्रियमैश्वरीं || 83 ||

ह्रीमित्येकं तावकं वाचकार्णं
यज्जिह्वाग्रे देवि जागर्ति किंचित् |
को वायं स्यात्कामकामस्त्रिलोक्यां
सर्वेऽस्मै देवाः बलिमावहंति || 84 ||

नाकस्त्रीणां किन्नरीणां नृपाणा-
-मप्याकर्षी चेतसा चिंतनीयं |
त्वत्पाणिस्थं कुंकुमाभं शिवे यं
द्विष्मस्तस्मिन्प्रति मुंचामि पाशं || 85 ||

नूनं सिंहासनेश्वर्यास्तवाज्ञां शिरसा वहन् |
भयेन पवमानोऽयं सर्वा दिशोऽनुविधावति || 86 ||

त्रिकलाढ्यां त्रिहृल्लेखां द्विहंसस्वरभूषितां |
यो जपत्यंब ते विद्यां सोऽक्षरः परमः स्वराट् || 87 ||

दारिद्र्याब्धौ देवि मग्नोऽपि शश्व-
-द्वाचा याचे नाहमंब त्वदन्यं |
तस्मादस्मद्वांछितं पूरयैत-
-दुषा सा नक्ता सुदुघेव धेनुः || 88 ||

यो वा यद्यत्कामनाकृष्टचित्तः
स्तुत्वोपास्ते देवि ते चक्रविद्यां |
कल्याणानामालयः कालयोगा-
-त्तं तं लोकं जयते तांश्च कामान् || 89 ||

साधकः सततं कुर्यादैक्यं श्रीचक्रदेहयोः |
तथा देव्यात्मनोरैक्यमेतावदनुशासनं || 90 ||

हस्तांभोजप्रोल्लसच्चामराभ्यां
श्रीवाणीभ्यां पार्श्वयोर्वीज्यमानां |
श्रीसंम्राज्ञि त्वां सदालोकयेयं
सदा सद्भिः सेव्यमानां निगूढां || 91 ||

इष्टानिष्टप्राप्तिविच्छित्तिहेतुः
स्तोतुं वाचां क्लुप्तिरित्येव मन्ये |
त्वद्रूपं हि स्वानुभूत्यैकवेद्यं
न चक्षुषा गृह्यते नापि वाचा || 92 ||

हरस्वरैश्चतुर्वर्गप्रदं मंत्रं सबिंदुकं |
देव्या जपत विप्रेंद्रा अन्या वाचो विमुंचथ || 93 ||

यस्ते राकाचंद्रबिंबासनस्थां
पीयूषाब्धिं कल्पयंतीं मयूखैः |
मूर्तिं भक्त्या ध्यायते हृत्सरोजे
न तस्य रोगो न जरा न मृत्युः || 94 ||

तुभ्यं मातर्योऽंजलिं मूर्ध्नि धत्ते
मौलिश्रेण्या भूभुजस्तं नमंति |
यः स्तौति त्वामंब चिद्वल्लिवाचा
तं धीरासः कवय उन्नयंति || 95 ||

वैरिंचोघैर्विष्णुरुद्रेंद्रबृंदै-
-र्दुर्गाकालीभैरवीशक्तिसंघैः |
यंत्रेशि त्वं वर्तसे स्तूयमाना
न तत्र सूर्यो भाति न चंद्रतारकं || 96 ||

भूत्यै भवानि त्वां वंदे सुराः शतमखादयः |
त्वामानम्य समृद्धाः स्युरायो धामानि दिव्यानि || 97 ||

पुष्पवत्पुल्लताटंकां प्रातरादित्यपाटलां |
यस्त्वामंतः स्मरत्यंब तस्य देवा असन्वशे || 98 ||

वश्ये विद्रुमसंकाशां विद्यायां विशदप्रभां |
त्वामंब भावयेद्भूत्यै सुवर्णां हेममालिनीं || 99 ||

वामांकस्थामीशितुर्दीप्यमानां
भूषाबृंदैरिंदुरेखावतंसां |
यस्त्वां पश्यन् संततं नैव तृप्तः
तस्मै च देवि वषडस्तु तुभ्यं || 100 ||

नवनीपवनीवासलालसोत्तरमानसे |
शृंगारदेवते मातः श्रियं वासय मे कुले || 101 ||

भक्त्याभक्त्या वापि पद्यावसान-
-श्रुत्या स्तुत्या चैतया स्तौति यस्त्वां |
तस्य क्षिप्रं त्वत्प्रसादेन मातः
सत्याः संतु यजमानस्य कामाः || 102 ||

बालिशेन मया प्रोक्तमपि वात्सल्यशालिनोः |
आनंदमादिदंपत्योरिमा वर्धंतु वांगिरः || 103 ||

माधुरीसौरभावासचापसायकधारिणीं |
देवीं ध्यायन् पठेदेतत्सर्वकामार्थसिद्धये || 104 ||

स्तोत्रमेतत्प्रजपतस्तव त्रिपुरसुंदरि |
अनुद्वीक्ष्य भयाद्दूरं मृत्युर्धावति पंचमः || 105 ||

यः पठति स्तुतिमेतां
विद्यावंतं तमंब धनवंतं |
कुरु देवि यशस्वंतं
वर्चस्वंतं मनुष्येषु || 106 ||

ये शृण्वंति स्तुतिमिमां तव देव्यनसूयकाः |
तेभ्यो देहि श्रियं विद्यामुद्वर्च उत्तनूबलं || 107 ||

त्वामेवाहं स्तौमि नित्यं प्रणौमि
श्रीविद्येशां वच्मि संचिंतयामि |
अध्यास्ते या विश्वमाता विराजो
हृत्पुंडरीकं विरजं विशुद्धं || 108 ||

शंकरेण रचितं स्तवोत्तमं
यः पठेज्जगति भक्तिमान्नरः |
तस्य सिद्धिरतुला भवेद्ध्रुवा
सुंदरी च सततं प्रसीदति || 109 ||

यत्रैव यत्रैव मनो मदीयं
तत्रैव तत्रैव तव स्वरूपं |
यत्रैव यत्रैव शिरो मदीयं
तत्रैव तत्रैव पदद्वयं ते || 110 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ त्रिपुरसुंदरी वेदपाद स्तवः |